## खण्डः 'क'

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

जीवने अनुशासनस्य महत्त्वपूर्णं स्थानम् अस्ति। अनुशासनं विना जनः जीवने एकं पदम् अपि धर्तुं न सक्षमो वर्तते। गृहे समाजे ग्रामे नगरे देशे विदेशे च सर्वत्र अनुशासनेन सर्वाणि कार्याणि पूर्णानि भवन्ति। यथा कमलेन जलं शोभते तथैव अनुशासनेन मनुष्यस्य जीवनं शोभते। नियमपालनमेव अनुशासनम्। यत्र नास्ति अनुशासनं तत्र नास्ति उन्नतिः सुखं च। अतः जीवने उन्नतेः सुखस्य च प्रथमं सोपानम् अनुशासनम्। अनुशासनपालनाय दण्डम् आवश्यकं करणीयम्। दण्डः शास्ति प्रजाः सर्वाः इति कथितम् ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) जीवने कस्य महत्त्वपूर्णं स्थानम् अस्ति?
(ख) अनुशासनं विना जनः जीवने किं धर्तुं न सक्षमो वर्तते?
(ग) केन सर्वाणि कार्याणि पूर्णानि भवन्ति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) यथा कमलेन जलं शोभते तथैव अनुशासनेन कस्य जीवनं शोभते?
(ख) अनुशासनपालनाय किम् आवश्यकं करणीयम्?
(ग) कस्मिन् उन्नतेः सुखस्य च प्रथमं सोपानम् अनुशासनम्?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत - ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) "उन्नतिः" इत्यस्य शब्दस्य विलोमपदं किम् ?
(क) अवनतिः (ख) मूर्खः
(ग) प्रवीणः (घ) पण्डितः

(ii) "जीवने" इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) तृतीया (घ) सप्तमी

(iii) "प्रजाः सर्वाः" अत्र विशेषणपदं किम्?
(क) प्रजाः (ख) कर्मयोगी
(ग) जनः (घ) सर्वाः

(iv) "मनुष्यस्य" इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) सप्तमी (घ) षष्ठी

Downloaded from cclchapter.com

(ग) महाभारतस्य रचयिता कः?
(घ) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति?
(ङ) रामायणे कति काण्डानि सन्ति?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति?
(ख) "सुवर्णशकटिका" इति पाठः कस्मात् ग्रन्थाद् उद्धृतः?
(ग) आदिकविना वाल्मीकिना कः ग्रन्थः रचितः?
(घ) शूद्रकस्य रचनायाः नाम किम्?
(ङ) चरकस्य रचनायाः नाम किम्?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) यण्-सन्धेः अथवा स्वरसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) अव्ययीभावसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) करणकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) "कदापि" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति -

(क) क + अपि (ख) कदा + अपि
(ग) कदाः + अपि (घ) कद + अपि

2) "प्रति+अहम्" इत्यत्र कः सन्धिः?

(क) यण्-सन्धिः (ख) अयादिसन्धिः
(ग) गुणसन्धिः (घ) दीर्घसन्धिः

Downloaded from cclchapter.com

